श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीगुरुपवनपुराधीशाय श्रीकृष्णाय परब्रह्मणे नमः

श्री मेल्पत्तूर् नारायणभट्टतिरेः कृतिषु

# ॥ श्रीमन्नारायणीये सप्तपञ्चाशं दशकम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीमन्नारायणीये सप्तपञ्चाशं दशकम् ॥

## प्रलम्बासुरवधवर्णनम्

रामसखः क्वापि दिने
    कामद भगवन् गतो भवान् विपिनम्।
सूनुभिरपि गोपानां
    धेनुभिरभिसंवृतो लसद्वेषः॥ 57.1 ॥

सन्दर्शयन् बलाय
    स्वैरं वृन्दावनश्रियं विमलाम्।
काण्डीरैः सह बालै -
    र्भाण्डीरकमागमो वटं क्रीडन्॥ 57.2 ॥

तावत्तावकनिधन -
    स्पृहयालुर्गोपमूर्तिरदयालुः।
दैत्यः प्रलम्बनामा
    प्रलम्बबाहुं भवन्तमापेदे॥ 57.3 ॥

जानन्नप्यविजान -
    न्निव तेन समं निबद्धसौहार्दः।
वटनिकटे पटुपशुप -
    व्याबद्धं द्वन्द्वयुद्धमारब्धाः॥ 57.4 ॥

गोपान् विभज्य तन्वन्
    सङ्घं बलभद्रकं भवत्कमपि।

त्वद्बलभीरुं दैत्यं
त्वद्बलगतमन्वमन्यथा भगवन्॥ **57.5** ॥

कल्पितविजेतृवहने
समरे परयूथगं स्वदयिततरम्।
श्रीदामानमधत्थाः
पराजितो भक्तदासतां प्रथयन्॥ **57.6** ॥

एवं बहुषु विभूमन्
बालेषु वहत्सु वाह्यमानेषु।
रामविजितः प्रलम्बो
जहार तं दूरतो भवद्भीत्या॥ **57.7** ॥

त्वद्दूरं गमयन्तं
तं दृष्ट्वा हलिनि विहितगरिमभरे।
दैत्यः स्वरूपमागा -
द्यद्रूपात् स हि बलोऽपि चकितोऽभूत्॥ **57.8** ॥

उच्चतया दैत्यतनो -
स्त्वन्मुखमालोक्य दूरतो रामः।
विगतभयो दृढमुष्ट्या
भृशदुष्टं सपदि पिष्टवानेनम्॥ **57.9** ॥

हत्वा दानववीरं
प्राप्तं बलमालिलिङ्गिथ प्रेम्णा।
तावन्मिलतोर्युवयोः
शिरसि कृता पुष्पवृष्टिरमरगणैः॥ **57.10** ॥

आलम्बो भुवनानां
प्रालम्बं निधनमेवमारचयन्।

कालं विहाय सद्यो
    लोलम्बरुचे हरे हरेः क्लेशान् ॥ **57.11** ॥

॥ इति श्रीमन्नारायणीये सप्तपञ्चाशं दशकं समाप्तम् ॥